दीपिकायाञ्च । यथा,—
“शुभग्रहार्कवारेषु मृदुक्षिप्रध्रुवेषु च ।
शुभराशिविलग्नेषु शुभं शान्तिकपौष्टिकम् ॥
मृदुगणः चित्रानुराधामृगशिरोरेवत्यः । क्षिप्रगणो लघुगणः पुष्याश्विहस्ताः । ध्रुवगणः रोहिण्युत्तरात्रयम् ॥)
“गोचरे वा विलग्ने वा ये ग्रहारिष्टसूचकाः ।
पूजयेत्तान् प्रयत्नेन पूजिताः स्युः शुभावहाः ॥”
इति ग्रहयागतत्त्वम् ॥
(मात्स्योक्तम् । यथा,—
“श्रीकामः शान्तिकामो वा ग्रहयज्ञं समाचरेत् ।
वृष्ट्यायुः पुष्टिकामो वा तथैवाभिचरन् पुनः ॥
येन ब्रह्मन् ! विधानेन तन्मे निगदतः शृणु ।
सर्व्वशास्त्राण्यनुक्रम्य सङ्क्षिप्य ग्रन्थविस्तरम् ॥
ग्रहशान्तिं प्रवक्ष्यामि पुराणश्रुतिनोदिताम् ।
पुण्येऽह्नि विप्रकथिते कृत्वा ब्राह्मणवाचनम् ॥
ग्रहान् ग्रहादिदेवांश्च स्थाप्य होमं समारभेत् ।
ग्रहयज्ञस्त्रिधा प्रोक्तः पुराणश्रुतिकोविदैः ।
प्रथमोऽयुतहोमः स्याल्लक्षहोमस्ततः परम् ।
तृतीयः कोटिहोमस्तु सर्व्वकामफलप्रदः ॥
अयुतेनाहुतीनाञ्च नवग्रहमखः स्मृतः ।
तस्य तावद्विधिं वक्ष्ये पुराणश्रुतिभाषितम् ॥”
ग्रहवेदिनियमः । यथा,—
“गर्त्तस्योत्तरपूर्व्वेण वितस्तिद्वयविस्तृताम् ।
वप्रद्वयावृतां वेदिं वितस्त्युच्छ्रयसम्मिताम् ॥
संस्थापनाय देवानां चतुरस्रामुदङ्मुखाम् ।
अग्निप्रणयनं कृत्वा तस्यामावाहयेत् सुरान् ॥
देवतानां ततः स्थाप्या विंशतिर्द्वादशाधिका ।
सूर्य्यः सोमस्तथा भौमो बुधजीवसितार्कजाः ॥
राहुः केतुरिति प्रोक्ता ग्रहा लोकहितावहाः ॥”
मण्डले स्थानम् । यथा,—
“मध्ये तु भास्करं विद्याल्लोहितं दक्षिणेन तु ।
उत्तरेण गुरुं विद्याद् बुधं पूर्व्वोत्तरेण न तु ॥
पूर्व्वेण भार्गवं विद्यात् सोमं दक्षिणपूर्व्वके ।
पश्चिमेन शनिं विद्याद्राहुं पश्चिमदक्षिणे ॥
पश्चिमोत्तरतः केतुं स्थापयेच्छुक्लतण्डुलैः ॥”
अधिदेवताः । यथा,—
“भास्करस्येश्वरं विद्यात् उमाञ्च शशिनस्तथा ।
स्कन्दमङ्गारकस्यापि बुधस्य च तथा हरिम् ।
ब्रह्माणञ्च गुरोर्विद्याच्छुक्रस्यापि शचीपतिम् ।
शनैश्चरस्य तु यमं राहोः कालन्तथैव च ।
केतोर्वै चित्रगुप्तञ्च सर्व्वेषामधिदेवताः ॥”
प्रत्यधिदेवताः । यथा,—
“अग्निरापः क्षितिर्विष्णुरिन्द्र ऐन्द्री च देवताः ।
प्रजापतिश्च सर्पाश्च ब्रह्मा प्रत्यधिदेवताः ॥”
पञ्च लोकपालाः । यथा,—
“विनायकं तथा दुर्गां वायुमाकाशमेव च ।
आवाहयेद्व्याहृतिभिस्तथैवाश्विकुमारकौ ॥”
ग्रहवर्णाः । यथा,—
“संसरेद्रक्तमादित्यमङ्गारकसमन्वितम् ।
सोमशुक्रौ तथा श्वेतौ बुधजीवौ च पिङ्गलौ ।
मन्दराहू तथा कृष्णौ धूम्रं केतुगणं विदुः ॥”
“ग्रहवर्णानि देयानि वासांसि कुसुमानि च ।
धूपामोदोऽत्र सुरभिरुपरिष्टाद्वितानकम् ॥
शोभनं स्थापयेत् प्राज्ञः फलपुष्पसमन्वितम् ॥”
अन्यद्विवरणन्तु ग्रहयागतत्त्वे द्रष्टव्यम् ॥)

ग्रहराजः, पुं, (ग्रहाणां राजा इति । “राजाहःसखिभ्यष्टच् ।” ५ । ४ । ९१ । इति टच् ।) सूर्य्यः । चन्द्रः । इति मेदिनी । जे । ३२ ॥ वृहस्पतिः । इति शब्दरत्नावली ॥

ग्रहाधारः, पुं, (ग्रहाणां आधारः आश्रयः । मेधीवदेतन्नक्षत्रमाश्रित्य स्वस्वगत्यनुसारेण ग्रहाणां परिभ्रमणात्तथात्वम् ।) ध्रुवनक्षत्रम् । इति शब्दरत्नावली ॥

ग्रहामयः, पुं, (ग्रहः उपदेवविशेषस्तज्जन्य आमयः रोगभेदः ।) आवेशः । स तु भूतादिना जातरोगः । इति राजनिर्घण्टः ॥

ग्रहाशी, [न्] पुं, (ग्रहं ग्रहजन्यदोषं अश्नाति दूरीकरोतीति । अश् + णिनिः । स्कन्दग्रहदोषमश्नातीत्येके ।) ग्रहनाशवृक्षः । इति शब्दरत्नावली ॥

ग्रहाह्वयः, पुं, (ग्रहाणामुपदेवानामाह्वयः आख्या संज्ञा यस्य । ग्रहान् आह्वयति आकारयति तज्जनितदोषमाशायेति भावः । आ + ह्वे + शः । इत्येके ।) भूताङ्कुशवृक्षः । इति राजनिर्घण्टः ॥

ग्रहीता, [ऋ] त्रि, (गृह्णातीति । ग्रह + तृच् ।) ग्रहणकर्त्ता । तत्पर्य्यायः । गृहयालुः २ । इत्यमरः । ३ । १ । २७ ॥ (यथा, श्वेताश्वतरोपनिषदि ।
“अपाणिपादो यवनो ग्रहीता
पश्यत्यचक्षुः स शृणोत्यकर्णः ।”
तथा च मनुः । ८ । १६६ ।
“ग्रहीता यदि नष्टः स्यात् कुटुम्बार्थे कृतो व्ययः ॥”)

ग्रामः, पुं, (ग्रस् + “ग्रसेरात् ।” उणां । १।१४२ । इति मन् धातोराकारान्तादेशश्च ।) विप्रादिवर्णप्राया प्राकारपरिखादिरहिता बहुजनवसतिः । इति भरतः ॥ तत्पर्य्यायः । संवसथः २ । इत्यमरः । २ । ३ । १९ ॥ हट्टादिशून्यवसतिः । इति श्रीधरस्वामी ॥ यथा, मार्कण्डेयपुराणे ।
“तथा शूद्रजनप्राया सुसमृद्धकृषीवला ।
क्षेत्रोपयोगभूमध्ये वसतिर्ग्रामसंज्ञिका ॥”
(तथा च मनुः । १० । ५४ ।
“अन्नमेषां पराधीनं देयं स्याद्भिन्नभाजने ।
रात्रौ न विचरेयुस्ते ग्रामेषु नगरेषु च ॥”)
शब्दादिपूर्व्वकश्चेत् समूहार्थः । इति विश्वः ॥ यथा शब्दग्रामः भूतग्रामः गुणग्रामः । इत्यादि ॥ (यथा, मनुः । २ । २१५ ।
“बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति ॥”
शिवः । यथा, महाभारते । १३ । १७ । ११३ ।
“गोपालिर्गोपतिर्ग्रामो गोचर्म्मवसनो हरिः ॥”)
स्वरभेदः । यथा,—
“षड्जमध्यमगान्धारास्त्रयो ग्रामा मता इह ।
षड्जग्रामो भवेदत्र मध्यमग्राम एव च ।
स्वर्लोके च गान्धारो ग्रामः प्रचरति स्वयम् ॥”
इदानीं षड्जग्रामस्य मूर्च्छनाः क्रियन्ते । मूर्च्छना प्रस्तार इत्यर्थः । ष ऋ ग म प ध नि । इति षड्जस्य । म-पौ ध-नी ष ऋ च गः । इति मध्यमस्य । ऋ गौ म-पौ ध नी षोऽन्ते । इति गान्धारस्य मूर्च्छनाः । ष ऋ ग म प ध निश्च । नि-षौ ऋ-ग-म-पाश्च धः । ध नि ष ऋ ग म पोऽन्ते । प-धौ नि-षौ ऋ-गौ च मः । म-पौ ध-नी च ष ऋ ग । ग म प ध नि षश्च ऋः । ऋ-गौ म-पौ ध-नी गोऽन्ते । मूर्च्छनाः सप्त षड्जाः ॥
“आदि द्वित्रिचतुःपञ्चषट्सप्तस्वपि सप्त मताः ।
मध्यमो मो यदा तेषु मध्यमग्राममूर्च्छना ॥
आदौ गकारो यत्रास्ति गान्धारग्राममूर्च्छना ॥”
तत्र षड्जग्रामप्रस्तारस्यायं क्रमः ।
“षड्जान्निषधान्तं नैषधान्तं धात् पान्तमिष्यते ।
पान्मान्तं मध्यमाद्गान्तं गादृषभान्तमिष्यते ॥
ऋषभात् षान्तमित्याहुः षड्जग्रामस्य मूर्च्छनाः ।
मध्यमग्रामजास्त्वेवं मूर्च्छनाः परिकीर्त्तिताः ॥
मकारादिक्रमेणैव गकारान्तास्तु ता मताः ।
तारो मन्द्रश्च आवश्च इति ग्रामनिरूपणाः ॥
षड्जग्राममूर्च्छनायाः सप्त कोष्ठानि ।
ब्रह्मविष्णुशिवैरुक्तास्त्रयो ग्रामा मनोहराः ॥”
इति सङ्गीतदामोदरः ॥

ग्रामकूटः, पुं, (ग्रामे ग्रामस्थो ग्रामस्य वा कूट इव तमःप्राधान्यात्तथात्वम् ।) शूद्रः । इति त्रिकाण्डशेषः ॥

ग्रामजनिष्पावी, स्त्री, (ग्रामे ग्रामसन्निकर्षे वा जायते इति । जन + डः । ग्रामजा निष्पावीति कर्म्मधारयः ।) नखनिष्पावी । इति राजनिर्घण्टः ॥

ग्रामणीः, पुं, (ग्रामाः जीवसमूहाः नीयते चैतन्यदानेन परिचाल्यतेऽनेन । यद्वा ग्रामान् जीवसमूहान् नयति प्रापयति चेतयतीत्यर्थः । नी + क्विप् ततो णत्वम् ।) विष्णुः । यथा, महाभारते । १३ । १४९ । ३७ ।
“अग्रणीर्ग्रामणीः श्रीमान् न्यायो नेता समीरणः ॥”
यक्षः । यथा, विष्णुपुराणे २ । १० । २ ।
“स रथाधिष्ठितो देवैरादित्यैरृषिभिस्तथा ।
गन्धर्व्वैरप्सरोभिश्च ग्रामणीसर्पराक्षसैः ॥”
“देवैरादित्यैः आदित्या एव देवास्तैः । ग्रामण्यो यक्षः ।” इति तट्टीका ॥ नापितः । इत्यमरः । ३ । ३ । ४९ ॥

ग्रामणीः, त्रि, (ग्रामं संवसथं तत्रत्यान् जनान् नयति दोषगुणविचारादिभिः परिचालयति प्रेरयति वा क्विप् ।) प्रधानः । अधिपतिः । इति मेदिनी । ने । ४५ ॥ (यथा, ऋग्वेदे । १० । १०७ । ५ ।
“दक्षिणावान् प्रथमो हूत एति
दक्षिणावान् ग्रामणीरग्रमेति ॥”
तथा च महागणपतिस्तोत्रे ८ ।
“दानामोदविनोदलुब्धमधुपप्रोत्सारणाविर्भवत्
कर्णान्दोलनखेलनो विजयते देवो गणग्रामणीः ॥